मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रस्येदमिति । मित्र+"तस्येदम् ।" ४।३।१२० । इति अण् ।) अनुराधानक्षत्रम् १७ । यथा,—

"मैत्राद्यपादे स्वपितीह विष्णु-
र्वैष्णवमध्ये परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥"

इति तिथ्यादितत्त्वम् ॥*॥

(मित्रः सूर्य्यो देवतास्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।
"पायुनोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् ।
पृथिवीं जघनेनाथ ऊरुभ्याञ्च प्रजापतिम् ॥"
यद्वा, मनुः । १२ । ७२ ।
"मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक् ॥")
पुरीषोत्सर्गः । यथा,—
"ततः कल्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
कल्यं उषःकालम् । मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ॥
अपि च ।
"ब्राह्मे मुहूर्त्ते चोत्तिष्ठेत् सुस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत् ॥"
मैत्रं मलमूत्रोत्सर्गः । इति राजवल्लभः ॥*॥
तत्र निषिद्धस्थानादि यथा,—
"छायाकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥
न गोमये न कृष्टे वा महावृक्षे च शाड्वले ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ॥
नद्यां नदसमीपे वा गोचरे न पराशुचौ ।
न सोपानत्पादुको हि छत्री वा नान्तरीक्षके ॥
न चैवाभिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ॥
न ज्योतींषि निरीक्षन् वा न वाय्वभिमुखोऽथवा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ॥"

इति कौर्म्मे उपविभागे १२ अध्यायः ॥

अस्य विस्तारस्तु पाद्मे उत्तरखण्डे १६० अध्याये द्रष्टव्यः ॥ * ॥ (मित्रस्य भावः । मित्र+अण् । मित्रता । यथा, मनुः । ८ । ११८ ।
"लोभात् मोहात् भयात् मैत्रात् कामात् क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥")
त्रि, मित्रसम्बन्धी ॥ (यथा, महाभारते । १२ । १४४ । २३ ।
"पिशुनां ये न भाषन्ते मित्रभेदकरीं गिरम् ।
ऋतं मैत्रञ्च भाषन्ते ते नराः स्वर्गगामिनः ॥"
मित्रताशाली । यथा, श्रीमद्भगवद्गीतायाम् । १२ । १३ ।
"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्म्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"
"मित्रभावो मैत्री मित्रतया वर्त्तते ।" इति श्रीशङ्करभाष्यम् ॥ "मैत्रः स्नीनेषु कृपालुः ।" इति श्रीधरस्वामी ॥ "मैत्री मित्रता तद्वान् मैत्रः ।" इति श्रीमधुसूदनसरस्वती ॥)

मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।
"जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्य्यादन्यन्न वा कुर्य्यान् मैत्रो ब्राह्मण उच्यते ॥"
"मित्रमेव मैत्रः स्वार्थे अण् ।" इति तट्टीकायां मेधातिथिकुल्लूकौ ॥ (उदयमुहूर्त्तात् तृतीयमुहूर्त्तः । तथा च बृहस्पतिः ।
"आर्द्रः सार्द्रस्तथा मैत्रः शुभो वासव एव च ॥"
यथा, कुमारे । ७ । ६ ।
"मैत्रे मुहूर्त्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ॥"
वर्णशङ्करविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

मैत्रभं, क्ली, (मैत्रञ्च तत् भञ्चेति ।) अनुराधानक्षत्रम् । इति जटाधरः ॥

मैत्रावरुणः, पुं, (मित्रश्च वरुणश्चेति । "देवताद्वन्द्वे च ।" ६।३।२६ । इत्यनङ् । ततः "देवताद्वन्द्वे च ।" ७।३।२१ । इति मित्रस्य वृद्धिः । "दीर्घाच्च वरुणस्य ।" ७ । ३ । २३ । इति वरुणस्य न वृद्धिः । तयोरपत्यमिति । मित्रावरुण+अण् ।) अगस्त्यः । इति शब्दरत्नावली ॥ (यथा, अथर्व्ववेदे । ५ । १९ । १५ ।
"न वर्षं मैत्रावरुणं ब्रह्मज्यमभिवर्षति ॥"
अस्य विवरणं यथा, ऋग्वेदे । ७ । ३३ । ११ ।
"उतासि मैत्रावरुणो वसिष्ठोर्व्वश्या ब्रह्मन् मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥"
"उतापि च हे वसिष्ठ ! मैत्रावरुण ! मित्रावरुणयोः पुत्रोऽसि ब्रह्मन् वसिष्ठ ! उर्व्वश्या अप्सरसो मनसो ममायं पुत्रः स्यादिति ईदृशात् संकल्पात् द्रप्सं रेतः मित्रावरुणयोरुर्व्वशीदर्शनात् स्कन्नमासीत् । तस्मादधिजातोऽसि । तथा च वक्ष्यते । सत्रे ह जाताविषिता । एवं जातं त्वा त्वां दैव्येन देवसम्बन्धिना ब्रह्मणा वेदराशिना अहम्भुवा युक्तं पुष्करे विश्वेदेवा अददन्त अधारयन्त । तथाचादितिर्मित्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते ।
तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधापतितं रेतः कलशे च जले स्थले ।
स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तमः ॥
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते ॥
कुम्भ इत्यभिधानञ्च परिमाणञ्च लक्ष्यते ।
ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्व्वतः पुष्करे तं हि विश्वे देवा अधारयन् ॥"

इति तद्भाष्ये सायणः ॥)

मैत्रावरुणिः, पुं, (मैत्रावरुणयोरपत्यमिति । मैत्रावरुण+"अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) अगस्त्यः । इत्यमरः । १ । ३ । २० ॥ (यथा, महाभारते । ३ । १०३ । १४ ।
"तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।
आश्रमस्थं तपोराशिं कर्म्मभिः स्वैरभिष्टुवन् ॥")

मैत्री, स्त्री, (मैत्र+ङीप् । यद्वा, मित्र+भावे ष्यञ् +ङीष् । ततः "हलस्तद्धितस्य ।" ६ ।४। १५० ।" इति यलोपः ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ ॥ व्यक्तिविशेषे-मैत्रीकरणनिषेधो यथा,—
"विद्विट्पतितोन्मत्तबहुवैरातिकीटकैः ।
बन्धकीबन्धकीभर्तृक्षुद्रानृतकथैः सह ॥
तथातिव्ययशीलैश्च परीवादरतैः शठैः ।
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ॥"

इति विष्णुपुराणे तृतीयेऽंशे ११ अध्यायः ॥

"विद्विडादिभिर्मैत्रीं न कुर्व्वीत । बहुभिर्व्वैरं यस्य । अतिकीटकः अत्यन्तं कीटवत् पीड़कः । कण्टकैरिति पाठेऽपि स एवार्थः । बन्धकी असती ।" इति तट्टीका ॥

मैत्रीबलः, पुं, (मैत्री मित्रता बलमस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥

मैत्रेयः, पुं, (मैत्रे मित्रतायां साधुरिति । मैत्र+ ढञ् ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ (मित्रयोः अपत्यमिति । मित्रयु+"गृष्ट्यादिभ्यश्च ।" ४ । १ । १३६ । इति ढञ् । ततः "केकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ ।२ । इति युस्थाने इयादेशे प्राप्ते । "दाण्डिनायनहास्तिनायन ।" ६ । ४ । १७४ । इति युलोपो निपातितः ।) मुनिविशेषः । यथा,—
"एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ।
प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥"

इति श्रीभागवते । ३ । ७ । १ ॥

(सूर्य्यः । यथा, महाभारते । ३ । ३ । २७ ।
"देहकर्त्ता प्रशान्तात्मा विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ॥"
वर्णसंकरजातिविशेषः । यथा, मनुसंहितायाम् । १० । ३३ ।
"मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टाताड़ोऽरुणोदये ॥"
"मैत्रेयकं नाम्ना वर्णम् ।" इति तत्र मेधातिथिः ॥
स्त्री । मैत्रेयेन उच्चारिता मैत्रेयी उपनिषद् ॥ याज्ञवल्क्यस्य पत्नी च ।) मित्रसम्बन्धिनि, त्रि ॥